শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥ আকাশনগরীশমঙ্গলম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ আকাশনগরীশমঙ্গলম্ ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রীমদৱ্যোমপুরীশায ভূদেৱ্যা গৃহমেধিনে।
পুত্রপৌত্রাদিপূর্ণায ব্রহ্মাদ্যৈরস্তু মঙ্গলম্॥ ১ ॥

মার্কণ্ডেযর্ষিমান্যায খণ্ডিতামরশত্রৱে।
পুণ্ডরীকদলাক্ষায মহীনাথায মঙ্গলম্॥ ২ ॥

শঠৱৈরিকলিধ্ৱংসিসরোৱেতালসূরিভিঃ।
নিত্যস্তুতপদাব্জায ধরণীশায মঙ্গলম্॥ ৩ ॥

ৱেদান্তদেশিকমুখৈরাচার্যৈরর্চিতাঙ্ঘ্রযে॥
আকাশনগরীশায ৱসুধেশায মঙ্গলম্॥ ৪ ॥

হেমমুক্তামণিৱ্যোমপুরীশা মতপতিস্তথা।
ইতি পঞ্চাৱতারায নিস্তুলেশায মঙ্গলম্॥ ৫ ॥

ঘটযিত্রে দুর্ঘটানাং সমাহর্ত্রে চ সংপদাম্।
ৱিনিহন্ত্রে চ ৱিপদাং মহীভর্ত্রেস্তু মঙ্গলম্॥ ৬ ॥

লাৱণ্যনিধযেপাস্তলৱণায মহীকৃতে।
কারুণ্যেনাৱতীর্ণায শরণ্যাযাস্তু মঙ্গলম্॥ ৭ ॥

শুদ্ধানন্দৱিমানেস্মিন্ স্ৱযংৱ্যক্তায তেজসে।
অহোরাত্রসরস্তীরপারিজাতায মঙ্গলম্॥ ৮ ॥

মার্কণ্ডেযস্য তার্ক্ষ্যস্য ধর্মসহ্যজযোরপি।
প্রত্যক্ষাযাম্বুজাক্ষায ধরানাথায মঙ্গলম্॥ ৯ ॥

ভূমিদেৱীসমেতস্য শ্রীনিৱাসস্য ভক্তিতঃ।
মঙ্গলাশাসনমিদং পঠতামস্তু মঙ্গলম্॥ ১০ ॥

মঙ্গলাশাসনপরৈর্মদাচার্যপুরোগমৈঃ।
সর্ৱৈশ্চ পূর্ৱৈরাচার্যৈঃ সতকৃতাযাস্তু মঙ্গলম্॥ ১১ ॥

যাৱদাৱর্ততে চক্রং যাৱতী চ ৱসুন্ধরা।
তাৱত্ ত্বমিহ সর্ৱস্য স্বামিত্বমনুৱর্তয॥ ১২ ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥

তপস্যে ফাল্গুনে মাসে একাদশ্যাং তিথৌ মুনে।
পুণ্যে শ্রৱণনক্ষত্রে মুহূর্তেভিজিদাহ্বযে॥

আজগাম মহাযোগী সাক্ষান্নারাযণো হরিঃ॥
স দেৱঃ শ্রীনিৱাসাখ্যো ভূমিদেৱ্যাঃ পতির্ৱিভুঃ॥

ৱসুন্ধরাৱিৱাহার্থং লোকানুগ্রহকাম্যযা।
শ্রিযঃ কান্তায কল্যাণনিধযে নিধযের্থিনাম্।
শ্রীমদৱ্যোমপুরীশায শ্রীনিৱাসায মঙ্গলম্॥

॥ ইতি আকাশনগরীশমঙ্গলম্ সমাপ্তম্ ॥

www.prapatti.com